# सिद्धसरस्वतीस्तोत्रम् २

Siddhasarasvatistotram 2

sanskritdocuments.org

February 19, 2019

Siddhasarasvatistotram 2

# सिद्धसरस्वतीस्तोत्रम् २

## Sanskrit Document Information

Text title : siddhasarasvatIstotram 2

File name : siddhasarasvatIstotram2.itx

Category : devii, devI, sarasvatI

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# सिद्धसरस्वतीस्तोत्रम् २

ॐ अस्य श्रीसरस्वतीस्तोत्रमन्त्रस्य मार्कण्डेयऋषिः,
स्रग्धरा-ऽनुष्टुप्-छन्दः, सरस्वतीदेवता, ऐं वीजं, वद वद
शक्तिः, स्वाहा कीलकं मम वाक् सिध्यर्थं जपे विनियोगः ।
न्यासः - ॐ ह्रीं अङ्गुष्ठाभ्यां नमः । ॐ ऐं तर्जनीभ्यां नमः ।
धी मध्यमाभ्यां नमः । ॐ क्लीं अनामिकाभ्यां नमः । ॐ सौं कनिष्ठि-
काभ्यां नमः । ॐ श्रीं करतलकरपृष्ठाभ्यां नमः ।
हृदयादिन्यासः - ॐ ह्रीं हृदयाय नमः । ॐ ऐं शिरसे स्वाहा । ॐ
धीं शिखायै वषट् । ॐ क्लीं नेत्रत्रयाय वौषट् । ॐ सौं कवचाय
हुम् । ॐ श्रीं अस्त्राय फट् ।
ध्यानं -
शुक्लां ब्रह्मविचार-सार-परमामाद्यां जगद्व्यापिनीं
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ १॥

दोर्भिर्युक्तैश्चतुर्भिः स्फटिकमणिमयीमक्षमालां दधानां
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
पाशं वीणां मुकुन्द-स्फटिकमणिनिभां भासमाना समाना
सा मे वादे च तथ्यं निवसतु वदने सर्वदा सुप्रसन्ना ॥ २॥

या कुन्देन्दु-तुषार-हार-धवला या शुभ्रवस्त्रावृता
या वीणा-वर-दण्ड-मण्डितकरा या श्वेतपद्मासना ।
या ब्रह्मा-ऽच्युत-शङ्कर-प्रभृतिभि-र्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ ३॥

इति ध्यात्वा, १०८ मन्त्रं जपेत् । ॐ ऐं धीं क्लीं सौं श्रीं सरस्वत्यै नमः ॥

ह्रीं ह्रीं ह्रीं हृद्यैकबीजे शशि-रुचि-कमले कल्पविस्पष्टशोभे

भव्ये व्यानुकूले शुभमतिवरदे विश्ववन्द्याङ्घ्रिपद्मे ।
पद्मे पद्मोपविष्टे प्रणत-जनमनोमोद-सम्पादयित्रि
प्रोत्फुल्लज्ञानकूले हरिहरनमिते देवि! संसारसारे ॥ १॥

ऐं ऐं ऐं जाप्यतुष्टे हिमरुचि-मुकुटे वल्लकीव्यग्रहस्ते
मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम् ।
विद्ये वेदान्तवेद्ये श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे
मार्गातीतस्वरूपे भव मम वरदे शारदे शुभ्रहारे ॥ २॥

धीं धीं धीं धारणाख्ये धृति-मति-नुतिभिर्नामभिः कीर्तनीये
नित्ये नित्ये निमित्ते मुनिजन-नमिते नूतने वै पुराणे ।
पुण्ये पुण्यप्रभावे हरिहरनमिते पूर्णतत्त्वस्वरूपे
मातर्मात्रार्थतत्त्वे! मति-मति-मतिदे! माधवप्रीतिनादे ॥ ३॥

क्लीं क्लीं क्लीं सुस्वरूपे दह दह दुरितं पुस्तकं व्यग्रहस्ते
सन्तुष्टाकारचित्ते स्मितमुखि सुभगे जृम्भिणि स्तम्भनीये ।
मोहे मुग्धप्रबोधे मम कुरु कुमति-ध्वान्त-विध्वंसमीड्ये
गी-गौं-र्वाग्भारतीत्वं कविधृतरसने सिद्धिदे सिद्धिसाध्ये ॥ ४॥

सौं सौं सौं शक्तिबीजे कमल-भवमुखाम्भोजमूर्तिस्वरूपे
रूपे रूपप्रकाशे सकलगुणमये निर्गुणं निर्विकल्पे ।
न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे जाप्यविज्ञानतुष्टे
विश्वे विश्वान्तराले सकलगुणमये निष्कले नित्यशुद्धे ॥ ५॥

श्रीं श्रीं श्रीं स्तौमि त्वाऽहं मम खलु रसनां मा कदाचित् त्यज त्वं
मा मे बुद्धिर्विरुद्धा भवतु मम मनो पातु मां देवि! पापात् ।
मा मे दुःखं कदाचित् क्वचिदपि विषये पुस्तके नाकुलत्वं
शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदाऽपि ॥ ६॥

इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो
वाणी वाचस्पतेरप्यविदितविभवो वाक्यतत्त्वार्थवेत्ता ।
स स्यादिष्टार्थलाभी सुतमिव सततं पातु तं सा च देवी
सौभाग्यं तस्य लोके प्रसरतु कविता विघ्नमस्तं प्रयातु ॥ ७॥

निर्विघ्नं तस्य विद्या प्रभवति सततं चाऽऽशु ग्रन्थप्रबोधः
कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षाद् ।
दीर्घायुर्लोकपूज्यः सकलगुणनिधिः सन्ततं राजमान्यते

वाग्देव्याः संप्रसादात् त्रिजगति विजयो जायते तस्य साक्षाद् ॥ ८॥

ब्रह्मचारी व्रती मौनी त्रयोदश्यामहर्निशम् ।
सारस्वतो जनः पाठाद् भवेदिष्टार्थलाभवान् ॥ ९॥

पक्षद्वये त्रयोदश्यामेकविंशतिसङ्ख्यया ।
अविच्छिन्नं पठेद्यस्तु सुभगो लोकविश्रुतः ।
वाञ्छितं फलमाप्नोति षण्मासैर्नाऽत्र संशयः ॥ १०॥

ॐ ह्रीं ऐं धीं क्लीं सौं श्रीं वद वद वाग्वादिन्यै स्वाहा । मालां शिरसि धृत्वा-
त्वं माले! सर्वदेवानां सर्वकामप्रदा मता ।
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ॥ इत्यर्पणम् ॥ ११॥

इति सनत्कुमारसंहितायां सिद्धसरस्वतीस्तोत्रं सम्पूर्णम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Siddhasarasvatistotram 2*
pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*